International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 124-127
© 2026 IJMH
www.themultijournal.com
Received: 24-09-2026
Accepted: 16-10-2026
Publish : 17-10-2026

**काजल**
शोधच्छात्रा,
लखनऊपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः

**Correspondence:**
**काजल**
शोधच्छात्रा,
लखनऊपरिसरः,
केन्द्रीयसंस्कृतविश्वविद्यालयः

# आर्यदेवस्य चतुःशतके आत्मप्रतिषेधः - एकं दार्शनिकं विवेचनम्

**काजल**

**सारसंग्रहः तथा मुख्यशब्दाः –**

**सारसंग्रहः –**

**आचार्यनागार्जुनविरचितायां मूलमध्यमककारिकायां** वर्णितयोः द्वयोः सत्ययोः (संवृतिसत्यस्य परमार्थसत्यस्य च)[1] भावनाविधिं व्याख्यातुम् **आचार्यार्यदेवेन** अस्य **चतुःशतकशास्त्रस्य** रचना कृता। अयं चतुःशतकग्रन्थो **माध्यमिकपरम्परायाः** महत्त्वपूर्णो ग्रन्थोऽस्ति, यस्मिन् **साधनापक्षस्य प्रज्ञापक्षस्य** च क्रमिकं निरूपणं दृश्यते। ग्रन्थस्य नवमप्रकरणात् पञ्चदशप्रकरणपर्यन्तं वस्तूनां स्वभावसिद्धास्तित्वसम्बन्धितानाम् विभिन्नानाम् आग्रहाणां प्रतिषेधः कृतः अस्ति। तेषु दशमप्रकरणम् **आत्मप्रतिषेधाय** समर्पितम् अस्ति। प्रस्तुतशोधपत्रे अस्यैव आत्मप्रतिषेधदृष्टेः विवेचनं कृतम् अस्ति। आर्यदेवः आत्मानं नित्यं, स्वतन्त्रं, स्वभावसिद्धं च तत्त्वं न स्वीकुर्वन्ति। त्रिविधलिङ्गस्य समस्यया आरभ्य ते आत्मनः देहात् भिन्नत्वं, कर्तृत्वं, कर्मफलभोक्तृत्वं, **जातिस्मरणं**, नित्यत्वं, निर्वाणस्य चाधाररूपेण आत्मनः आवश्यकताम् इत्यादीनाम् आपत्तीनां क्रमशः समीक्षां कुर्वन्ति।

चतुःशतकेऽनित्येषु भावेष्वात्मकल्पनायाः व्याख्या क्रियते। **आचार्यचन्द्रकीर्तेः** व्याख्या अस्मिन् बिन्दौ अधिकं स्पष्टं करोति यत् **पञ्चस्कन्धेभ्यः** पृथक् कश्चित् स्वभावसिद्धः आत्मा सिद्धो न भवति, आत्मनः संज्ञा स्कन्धानाम् आश्रयेण व्यावहारिकरूपेण अवगम्यते। एवम् आत्मप्रतिषेधस्य निष्कर्षः **शून्यवादात्मक उच्छेदवादो** न, अपितु **निःस्वभाववादः** अस्ति।

**प्रस्तावना-**

भारतीयदार्शनिकपरम्परासु आत्मा कदाचित् नित्या, कदाचित् स्वतन्त्रा, कदाचित् स्थायिनी कदाचित् शरीराच्च पृथग् अधिष्ठानरूपेण स्वीकृता। बौद्धदार्शनिकपरम्परया एतादृशस्य स्थायिनः आत्मतत्त्वस्य स्थापनं न स्वीकृतम्।

चतुःशतकं चतुःशतकारिकाणां ग्रन्थः अस्ति, यः षोडशप्रकरणेषु विभक्तो मन्यते। प्रत्येकस्मिन् प्रकरणे पञ्चविंशतिः कारिकाः सन्ति। तस्य प्रथमभागे संवृतिसत्यस्य (साधकस्य दृष्टिकोणस्य आचरणस्य च सज्जता) उत्तरार्धे च परमार्थसत्यस्य (धर्माणां स्वभावसिद्धतायाः विषये प्रश्नः) प्रतिपादनं कृतम् अस्ति। नवमप्रकरणं नित्यं मन्यमानानां पदार्थानां प्रतिषेधं करोति, ततः परं दशमप्रकरणम् आत्मसम्बन्धिनः एव विश्लेषणम् अग्रे वर्धयति। विधुशेखरभट्टाचार्येण सम्पादिते Catuḥ ś ataka ग्रन्थे दशमाध्याये **"Refutation of Ā tman"** इत्याख्यं शीर्षकं दत्तम् अस्ति, यस्य आशयः आत्मप्रतिषेधः इति अस्ति।[2] आत्मप्रतिषेधेन आशयः आत्मनः व्यावहारिकप्रयोगस्य निषेधो न, अपितु तस्य स्वतन्त्रस्य नित्यस्य, स्वभावसिद्धस्य चास्तित्वस्य निषेधः अस्ति। चतुःशतकस्य संस्कृतमूलप्रतिः पूर्णरूपेण उपलब्धा नास्ति, संस्कृतेन सह तिब्बतीचीनीपरम्परयोः उपयोगः पाठपुनर्निर्माणे कृतः। भट्टाचार्यः स्वयम् अपि स्वसंस्करणस्य भूमिकायां कथयति यत् यत्र मूलसंस्कृतपाठं उपलब्धो नासीत्, तत्र तिब्बतीपाठम् आधारीकृत्य संस्कृतपुनर्निर्माणस्य आवश्यकता अभवत्।

आत्मनः सम्बन्धे सामान्यधारणा भवति यत् शरीरं परिवर्तितुं शक्नोति, मनसः अवस्थाः परिवर्तितुं शक्नुवन्ति, किन्तु एतेषां पृष्ठतः कश्चित् 'अहम्' अवश्यं वर्तते यः स्वयम् अपरिवर्तनशीलः तिष्ठति। तथैव कर्तृत्वं भोक्तृत्वं स्मृतिः पुनर्जन्ममोक्षश्च अपि कदाचित् एतादृशस्य स्थायिनः आत्मतत्त्वस्य आधारेण व्याख्यायन्ते। माध्यमिकतर्कः एतां धारणां, तस्याः कारणैः परिणामैश्च सह परीक्षते।

**विषयोपस्थापनम् –**

आचार्यार्यदेवस्य मतानुसारम् आत्मदृष्टेः सम्बन्धः 'अहम्', 'मम' इत्यस्य ग्रहणप्रवृत्त्या सह अस्ति। माध्यमिकानां मते आत्मा न स्वतन्त्रः स्वभावसिद्धश्च भावः, अपितु पराश्रितत्वात् अनात्मस्वरूपः

मन्यते। नैरात्म्यं तस्य स्वतन्त्रस्वभावस्य अभावं सूचयति। अस्यामेव व्याख्यायां पुद्गलः पञ्चोपादानस्कन्धानाम् आधारेण प्रज्ञप्तमानः मन्यते। अतः माध्यमिकात्मप्रतिषेधः द्वयोः स्तरयोः ज्ञातव्यः - व्यवहारे व्यक्तेः स्वीकारः परमार्थतः च स्वतन्त्रस्य आत्मस्वभावस्य निषेधः। माध्यमिकदार्शनिकविवेचनस्य प्रमुखः विषयः कस्यापि वस्तुधर्मस्य स्वतन्त्रस्थायिस्वभावसिद्धसत्तायाः परीक्षणमस्ति। तस्य बोधाय सर्वप्रथमम् एतत् स्पष्टीकरणम् आवश्यकं, यत् अत्र प्रतिषेधस्य आशयः केवलम् आत्मनः व्यावहारिकसत्तायाः निषेधः नास्ति, अपि तु तस्योपरि आरोपितस्य स्वतन्त्रस्य, नित्यस्य आत्मस्वभावस्य निरसनम् अस्ति। माध्यमिकानां दृष्ट्या आत्मनः सम्बन्धेऽपि एषः प्रश्नः उत्पद्यते यत् यः आत्मा नित्यस्वरूपी, स्वतन्त्रः मानवीयदेहाच्च पृथग् सत्तारूपेण स्वीक्रियते, किं तस्यः एतादृशी स्वभावसिद्धा सत्ता तार्किकरूपेण स्थापयितुं शक्यते न वा ? एवं माध्यमिकेषु अयं विषयः (आत्मप्रतिषेधः) मूलतः आत्मनः कल्पनायुक्तस्वभावसत्तायाः तार्किकपरीक्षया सम्बद्धः अस्ति। आचार्यनागार्जुनविरचितायां मूलमध्यमककारिकायाम् अष्टादशतमं प्रकरणम् आत्मपरीक्षानाम्नैव ज्ञायते। अस्याष्टादशतमस्य प्रकरणस्य प्रथमकारिकायाम् आत्मनः स्कन्धैः सह स्थापितसम्बन्धस्य द्वयोः सम्भावनयोः परीक्षा कृता अस्ति-

**आत्मा स्कन्धा यदि भवेदुदयव्ययभाग्भवेत्।**
**स्कन्धेभ्योऽन्यो यदि भवेद्भवेदस्कन्धलक्षणः॥**[3]

अस्याः कारिकायाः आशयोऽयम् अस्ति यत् यदि आत्मा एव स्कन्धाः मन्यन्ते, तर्हि सः स्कन्धसदृश उत्पत्तिविनाशधर्मा भवेत्, यदि च वयं वदेम यत् आत्मा स्कन्धेभ्यः भिन्नः अस्ति, तर्हि अपि आपत्तिरस्ति यत् आत्मनि स्कन्धानां लक्षणानि एव न प्राप्यन्ते। एवं स्कन्धैः आत्मनः समानता असमानता च उभयोः पक्षयोः तार्किककाठिन्यं दृश्यते। अयमेव तर्कः अस्मान् एतत् बोधयितुं सहाय्यं करोति यत् माध्यमिकाऽनुसारम् आत्मप्रतिषेधस्य मूलपद्धतिः का अस्ति ?

माध्यमिकदर्शने आत्मनः कस्यापि स्वतन्त्रस्य अस्तित्वस्य केवलं प्रत्यक्षनिषेधो न कृतः, अपितु आत्मनः सम्भावितस्वरूपस्य तस्य च स्कन्धैः सह सम्बन्धस्यापि परीक्षणं कृतम् अस्ति। आचार्य-नागार्जुनविरचिते मूलमध्यमककारिकाग्रन्थे आत्मनः 'इदं मम' इत्याद्यात्मीयधारणया सह सम्बन्धस्य निर्देशः प्राप्यते। आत्मनः दृढतया ग्रहणे सति तस्मिन् सम्बद्धस्य ममत्वस्य अहंकारधारणायाश्च स्थापना अपि भवति एवं यः आत्मीयस्वभावं स्वीकरोति, तस्य मनुष्यस्य स्वस्मिन् स्नेहः सदैव तिष्ठति, येन तृष्णा उत्पद्यते, सा च तृष्णा दोषावृता भवति। साधकेन सर्वे धर्माः एवं प्रकारेण नैव स्वीकरणीयाः, तेन विषयेषु विचारः कर्तव्यः। तृष्णातः उपादानस्योत्पत्तिर्भवति एवं प्रकारेण यावत् आत्माभिनिवेशः स्वीक्रियते तावत् अस्य संसारस्य सत्ता स्थास्यति। आत्मशब्दस्य प्रयोगेणैव स्वस्य परस्य च ज्ञानं भवति, येन रागद्वेषयो-रुत्पत्तिर्भवति। रागद्वेषावेव सर्वेषां दोषाणाम् उत्पत्तेः हेतू स्तः, अतः सर्वेषां दोषाणाम् उत्पत्तेः निदानं केवलम् आत्मदृष्टेः यथार्थज्ञानेन एव सम्भवति। बुद्धधर्मस्य शान्तिप्रियत्वस्य मुख्यं कारणं नैरात्म्यवादस्य स्वीकृतिः अस्ति। आचार्यचन्द्रकीर्तिमतानुसारं सत्कायदृष्टेः विद्यमानतायाः कारणादेव समस्तदोषोत्पत्तेः व्यावहारिकदृष्टिः स्वीकृता अस्ति। एताम् अवधारणां स्वीकृत्य उक्तम् अस्ति यत्-

**सत्कायदृष्टिप्रभवानशेषान् क्लेशांश्च दोषांश्च धिया विपश्यन्।**
**आत्मानमस्या विषयं च बुद्ध्वा योगी करोत्यात्मनिषेधमेव।।**[4]

अर्थात् साधकः सत्कायदृष्ट्या उत्पद्यमानैः सर्वैः क्लेशैरेव प्रज्ञां जानाति ताम् अवलोकयति च। अन्ततः आत्मैव अस्याः सत्कायदृष्टेः मुख्यविषयः इति विज्ञाय सः साधकः तस्य आत्मनः निषेधाय अग्रेसरति। अनात्मवाद एव पुद्गलनैरात्म्यस्य च सत्कायदृष्टेः संज्ञया अभिहितः।

सैव सत्कायदृष्टिः आत्मग्राहदृष्टिः, आत्माभिनिवेशः एवं आत्मवादः अपि कथ्यते। **"आत्मन्यसति चात्मीयं कुत एव भविष्यति"**[5] अर्थात् यदा आत्मनः सत्ता परतन्त्रा अस्ति, तर्हि तस्मिन् ममत्वभावः कथम् आगमिष्यति ? 'अहम्' 'मम' चेति धारणायाः शान्त्यैव ममकार-भावनायाः निरोधः सम्भविष्यति। **"निर्ममो निरहंकारः शमादात्मात्मनीनयोः"**[6] अर्थात् या व्यक्तिः 'अहम्' तथा 'मम' इति भावनाभ्यां मुक्त्वा आत्मनि आत्मीयवस्तुषु च आसक्तेः शमनं करोति, सः निर्ममो निरहंकारी च कथ्यते।

आचार्यनागार्जुनेन आत्मा परतन्त्रः निःस्वभाववादी च मन्यते। आचार्यार्यदेवेन एतामेव धारणां विकसित्य आत्मग्राहस्य आत्मसम्बन्धिनां मिथ्याधारणानां च विशदं खण्डनं कृतम्। आचार्यार्यदेवमते आत्मनः आग्रह एव मिथ्यादृष्टेः आधारः मन्यते, यस्मात् अज्ञानी मनुष्यः देहे, इन्द्रिये, मनसि अन्येषु धर्मेषु च ममत्वभावं स्वीकरोति, अतः आत्मनः स्वभावसिद्धसत्तायाः खण्डनं सत्कायदृष्टेः समाधानस्य दार्शनिकम् आधारं भवति। आचार्यनागा-र्जुनेन आत्मनः स्कन्धैः सह सम्बन्धस्य तार्किकं परीक्षणं कृतम्। तत्रैव आचार्यार्यदेवः आत्मनि आसक्तेः, तदुत्पन्नानां मिथ्याधारणानां च खण्डनं करोति। आचार्यनागार्जुनः आत्मानं स्कन्धेभ्यः न पूर्णतः पृथक् न च स्वतन्त्रं सिद्धं करोति। आचार्यार्यदेवः आत्मनः स्वभावसिद्धसत्ताम् अस्वीकरोति। आचार्यनागार्जुनेन अनात्मनः शून्यतायाश्च सिद्धान्ते बलं दत्तम्।

इयमेव 'अहम्', 'मम' चेति भावना स्वीकरणं सत्कायदृष्टेः मूलस्वरूपम् अस्ति। आचार्यनागार्जुनः आत्मानं स्कन्धेभ्यः पृथग् अथवा तेभ्यः स्वतन्त्रं द्वयोरपि रूपयोः असिद्धं ज्ञात्वैव आत्मग्राहस्य खण्डनं करोति। वयं शरीरं चेतनां भावनाः विचारांश्च संयोज्य 'अहम्' इति नाम दद्मः, किन्तु तेषां पृष्ठतः काश्चित् पृथक् शाश्वदात्मा अस्ति, इति अप्रमाणितम् अस्ति। तत्र आचार्यार्यदेवेन आत्मग्राहस्य समाधानाय प्रज्ञोत्पत्तये च बलं दत्तम्। आचार्यनागार्जुनार्यदेवयोः उभयोः दर्शनदृशा सत्कायदृष्टेः मूलाधारः आत्मनं प्रति स्वभावाग्रहः स्वीकृतेऽस्ति। आचार्यनागार्जुनो यत्र आत्मनः सम्बन्धस्य तार्किकपरीक्षया आत्मनः स्वातन्त्र्यसत्तां न्यक्करोति, तत्रैव आचार्या-र्यदेवः आत्मग्राहदृष्टेः आलोचनाम् अग्रे वर्धयति। उभयोः मते आत्मनः निषेधस्य अर्थे नैषे यत् कस्याश्चित् व्यक्तेः अस्तित्वमेव नास्ति, अपि तु आत्मीयस्वतन्त्रसत्तायाः तस्याः स्थायिसत्तायाः च कल्पनायाः

निषेधः अस्ति। दशमप्रकरणस्य प्रथमकारिका आत्मानं लिङ्ग-विशेषेण सम्बद्धां कर्तुं धारणां परीक्षते -

**अन्तरात्मा यदा न स्त्री न पुमान्न नपुंसकम् ।**
**तदा केवलमज्ञानाद् भावस्तेहं पुमानिति ॥ १॥**[7]

आशयोऽयम् अस्ति यत् यदि आत्मा नित्यः स्वतन्त्रश्च अस्ति, तर्हि तस्य स्त्रीत्वं पुंस्त्वम् अथवा नपुंसकत्वं कथं सम्भवेत् ? यदि आत्मा वास्तवतः केनचित् एकेन लिङ्गेन स्वभावतः युक्तोऽस्ति, तर्हि जन्मान्तरेऽपि तदेव लिङ्गं स्थायिरूपेण स्थातव्यम्। अनुभवे तु एवं न दृश्यते। आचार्यचन्द्रकीर्तिः एतदेव रज्जौ सर्पारोपस्य उपमया स्पष्टयति यत् वस्तुनः वास्तविकं स्वरूपं न ज्ञात्वा तस्योपरि अन्यद्रूपम् आरोप्यते।[8]

अत्र एकः महत्त्वपूर्णः प्रश्नः उत्पद्यते यत् **"यदा सर्वेषु भूतेषु नास्ति स्त्रीपुंनपुंसकम्"**[9] तर्हि तेषामेव आश्रयेण आत्मनि एतानि लिङ्गानि कथं स्वभावतः स्थापितानि भवितुम् अर्हन्ति ?

अस्याः आपत्तेः समाधानार्थम् आर्यदेवः तर्कं द्वितीयस्तरे नयति यद्वस्तु स्वस्वरूपेण असिद्धे सति अन्यस्य आश्रयेण निर्धार्यते, तन्नित्यं, स्वतन्त्रमात्मद्रव्यञ्चेति मन्तुं माध्यमिकदृष्ट्या काठिन्यं भवति।

**यस्तवात्मा ममानात्मा मेनात्मा नियमान्न सः।**
**नन्वनित्येषु भावेषु कल्पना नाम जायते ॥३॥**[10]

अर्थात् यत् तव आत्मा अस्ति, तन्मम आत्मा नास्ति; अतः तं निश्चितरूपेण स्वभावसिद्धः आत्मा इति न कथयितुं शक्यते। अयं श्लोकः आत्मनः अत्यन्तसूक्ष्मस्य दार्शनिकपरीक्षणस्य उदाहरणम् अस्ति। यदि आत्मा वस्तुतः एकः कश्चन स्वतन्त्रः स्वभावसिद्धः च सत्ता भवेत्, तर्हि तस्य स्वरूपं केवलम् कस्याश्चित् व्यक्तेः 'अहम्' इत्यस्य विषयो न भूत्वा सार्वभौमत्वेन तेनैव प्रकारेण सिद्धं भवितव्यम्। चन्द्रकीर्तिरपि एतं तर्कम् अग्नेः उष्णतया स्पष्टयति, यदि उष्णता अग्नेः स्वभावः अस्ति, तर्हि सः कस्यचित् एकस्य कृते उष्णः अन्यस्य कृते च अनुष्णो न भवितुं शक्नोति।[11]

यथा ईन्धनस्य आधारेण अग्नेः संज्ञा भवति, तथैव स्कन्धानाम् आधारेण 'आत्मा' इति प्रज्ञप्तिः क्रियते । अत्र एतत् महत्त्वपूर्णं बोध्यम् अस्ति यत् 'प्रज्ञप्तिः' इत्यस्य अर्थः पूर्णतः निरर्थका कल्पना नास्ति, अपि तु तस्याः अतिरिक्तकल्पनायाः बोधकः अस्ति, यस्याम् एतां प्रज्ञप्तिम् स्वतन्त्रं द्रव्यम् इति मन्यते।

एवमेव बिन्दुः माध्यमिकदर्शनम् उच्छेदवादात् पृथक् करोति। यदि आत्मनः स्वतन्त्रसत्तायाः निषेधः कृतः, तर्हि अस्य अर्थः न एषः यत् पञ्चस्कन्धाः कर्मसन्ततिः अनुभवः व्यवहारश्च सर्वथा नष्टाः असन्तो वा सन्ति। ते प्रतीत्यसमुत्पन्नाः सन्ति, अत एव स्वभावशून्याः सन्ति। चन्द्रकीर्तेः चतुःशतकवृत्त्यनुसारं पूर्वपक्षः आत्मानं प्रवृत्तेः निवृत्तेश्च कारणम्, कर्मणः कर्तारं, तत् फलस्य च भोक्तारं मन्यते। यदि आत्मा न स्यात्, तर्हि कर्मफलव्यवस्था जन्मान्तरसन्ततिश्च असम्भवा इव प्रतीयेताम्।[12]

अत्र माध्यमिकमतस्य दृष्ट्या एषः प्रश्नः उपस्थितो भवति यत् नित्यम् आत्मद्रव्यं स्थापयितुं किमर्थम् आवश्यकं मन्यते ?

आर्यदेवः अस्य प्रश्नस्य तार्किकं परीक्षणं कुर्वन् नित्यस्य स्वतन्त्रस्य च आत्मद्रव्यस्य सत्ताम् अस्वीकुर्वन् तच्च तार्किकरूपेण सिद्धं कुर्वन् कथयति यत्-

**देहद्विकृतं याति पुमाञ्जन्मनि जन्मनि ।**
**देहात्तवान्यता तस्य नित्यता च न युज्यते ॥ ४॥**[13]

तात्पर्यम् एतत् अस्ति यत् यदि जनः जन्मजन्मान्तरेषु शरीरस्य परिवर्तनानुरूपं परिवर्तनं प्राप्नोति, तर्हि आत्मानं शरीरात् सर्वथा भिन्नं नित्यं च मन्तुं युक्तिसङ्गतं नास्ति। यद्वस्तु स्पर्शरहितमस्ति, तस्मिन् प्रेरणां वा गतिं वा उत्पादयितुं सम्भवं नास्ति। अतः शरीरस्य चेष्टानां कर्तारं कमपि तादृशं स्वतन्त्रं जीवम् मन्तुं युक्तिसङ्गतं नास्ति, यः स्वयम् स्पर्शस्थानसम्बन्धाभ्यां रहितः भवेत्। यदि दुःखम् आत्मानं स्प्रष्टुम् एव न शक्नोति, तर्हि दुःखनिवारणम्, अहिंसा साधना च प्रयोजनं तस्यैव आत्मनः संरक्षणेन सम्बद्धं कर्तुम् असङ्गतं भवेत्। आचार्यार्यदेवः आत्मवादिभ्यः पृच्छति यत्-

**जातिस्मरणसद्भावादात्मा_ते यदि शाश्वतः ।**
**क्षतं पूर्वकृतं दृष्ट्वा कायस्ते किमशाश्वतः ॥ ७॥**[14]

यदि जन्मान्तरस्य स्मृतिसन्ततिं सिद्धयितुं त्वम् आत्मानं नित्यम् मन्यसे, तर्हि पूर्वजन्मनः शरीरे वर्तमानस्य शरीरस्य वा परिवर्तनं दृष्ट्वा तम् अनित्यम् इति किमर्थं न मन्यसे ?

आचार्यार्यदेवमते कर्मफलस्य सन्तत्यै कस्यापि स्थायिनः आत्मनः आवश्यकता न मन्यते। कारणप्रभावयोः निरन्तरता स्थातुं शक्नोति, यद्यपि प्रत्येकक्षणस्य धर्माः अनित्याः सन्ति। अयमेव माध्यमिकदृष्टौ 'सन्ततेः' 'स्वभावस्य' च अन्तरम् अस्ति। अस्मिन् बिन्दौ बौद्धकर्मसिद्धान्तस्य आत्मवादस्य च मध्ये सूक्ष्मो भेदो दृश्यते।

यदि बुद्धिः, चेतना चेत्यादयः आत्मनः गुणाः सन्ति, तर्हि आत्मनः तैः गुणैः सम्बन्धः कीदृशः स्यात् ? परिवर्तनशीलगुणानाम् अपरिवर्तनशीलात्मना सह वास्तविकसम्बन्धं स्थापयितुं सरलम् नास्ति।

माध्यमिकपद्धतिः अस्य सम्बन्धस्य अपि स्वभावसिद्धत्वं स्वीकर्तुं निवारयति। आचार्यार्यदेवेन चतुःशतके उक्तम् अपि यत् **"क्रियावाञ्छाश्वतो नास्ति"**[15] अर्थात् यः क्रियावान् अस्ति, सः शाश्वतः नास्ति।

बौद्धेषु व्यक्तिः पञ्चोपादानस्कन्धानाम् (रूपम्, वेदना, संज्ञा, संस्कारः विज्ञानं चेति)[16] आधारेण व्याख्यायते। आत्मप्रतिषेधस्य एकः महत्त्वपूर्णः पक्षः अयम् अस्ति यत् एतेभ्यः स्कन्धेभ्यः पृथग् किमपि तादृशम् आत्मद्रव्यं न लभ्यते, यत् 'अहम्' इति वास्तविकस्य आधाररूपेण स्थापयितुं शक्येत। यदि पञ्चस्कन्धेभ्यः पृथग् आत्मा स्वीक्रियते, तर्हि तस्य अस्तित्वस्य स्वतन्त्रं प्रमाणं दातव्यम्।

ये धर्माः हेतु-प्रत्ययेषु आश्रित्य उत्पद्यन्ते, ते स्वतन्त्रस्वभावेन सिद्धाः न मन्यन्ते। व्यक्तिरपि शरीरस्य, वेदनायाः, संज्ञायाः,

संस्कारस्य, विज्ञानस्य, कर्मणः, संस्कारसन्ततेः चेत्यादीनां परस्पर-सम्बन्धम् आश्रित्य व्यवहारे स्थापितो भवति।

एवं प्रकारेण आत्मनः कर्तृत्वस्य नित्यत्वस्य च मध्ये विरोधः स्पष्टो भवति। आत्मनः स्वभावसिद्धतायाः ग्रहणं न्यूनं भवति चेत् आत्मस्नेहस्य, अहङ्कारस्य, तेभ्यः उत्पन्नानां क्लेशानां च शक्तिरपि क्षीणा भवितुम् अर्हति।

**शोधपद्धतिः –**

प्रस्तुतशोधपत्रे मुख्यतः विश्लेषणात्मकपद्धतेः, पाठविश्लेषणात्मकपद्धतेः व्याख्यात्मकपद्धतेश्च अनुसरणं कृतम् अस्ति। चतुःशतके आत्मसम्बन्धिनां श्लोकानां मूलपाठस्य चन्द्रकीर्तिवृत्तेः च आधारेण अध्ययनं कुर्वन् आत्मनः यथार्थस्वरूपस्य, नित्यतानित्यतायाः, देहात्मनोः सम्बन्धस्य नैरात्म्यवादस्य च प्रतिपादनस्य दार्शनिकं विश्लेषणं कृतम् अस्ति।

**निष्कर्षः -**

आचार्यार्यदेवः आत्मनः अस्तित्वस्य न केवलं सामान्यनिषेधं करोति, अपितु आत्मनः यथार्थसत्तायाः ज्ञानाय प्रस्तुतानां विभिन्नप्रमाणानां परीक्षणं करोति। पञ्चस्कन्धानां सन्ततिः व्यक्तेः च व्यावहारिकी सत्ता स्वीकरणीया अस्ति, किन्तु तेषु स्वतन्त्रस्य आत्मस्वभावस्य आरोपः स्वीकरणीयः नास्ति। आत्मप्रतिषेधस्य आधारः प्रतीत्यसमुत्पन्नः अस्ति तथा च निःस्वभावयुक्तः अस्ति।

कर्मणः पुनर्जन्मनः च व्यवस्थां स्वीकरणाय नित्यस्य आत्मनः आवश्यकता नास्ति, अतः हेतुप्रत्ययसन्तत्या कर्मफलस्य सम्बन्धो व्याख्यातुं शक्यते। निर्वाणप्राप्तेः लक्ष्यं कस्यचित् नित्यस्य आत्मनः संरक्षणं नास्ति, अपितु आत्मग्राहस्य तेन सम्बद्धानां क्लेशानां च निवृत्तिः अस्ति। आत्मप्रतिषेधः अस्मान् माध्यमिकशून्यतायाः व्यापकपद्धतिं प्रति नयति।

**संदर्भ-ग्रन्थ-सूची –**


- आर्यदेवः, चतुःशतकम् (चन्द्रकीर्तिवृत्त्या हिन्दीभाषानुवादेन च सहितम्), सम्पादकोऽनुवादकश्च भास्कर जैनः, भारतीय बुक्स, दिल्ली, २०२२।
- आर्यदेवः, चतुःशतकम् (चन्द्रकीर्तिवृत्तिसहितम्), सम्पादकोऽनुवादकश्च भागचन्द्र जैन भास्कर, आलोक प्रकाशन, नागपुर, १९७१।
- आर्यदेवः, चतुःशतकम् (प्रथमाष्ट-प्रकरणानि, प्रथमो भागः), पुनरुद्धारकः अनुवादकः सम्पादकश्च डॉ. गुरुचरण सिंह नेगी, धीः पब्लिकेशन्स, दिल्ली, २०१८।
- नागार्जुनः, मध्यमकशास्त्रं (चन्द्रकीर्तिप्रणीतया प्रसन्नपदा-ख्यटीकया सहितम्), सम्पादकः पी. एल. वैद्यः, मिथिला इन्स्टिट्यूट ऑफ पोस्ट-ग्रेजुएट स्टडीज एण्ड रिसर्च इन संस्कृत लर्निंग, दरभंगा, १९६०।
- चन्द्रकीर्तिः, मध्यमकावतारः स्वोपज्ञभाष्यसहितः (षष्ठः परिच्छेदः), सम्पादकोऽनुवादकश्च पेमा तेन्जिन्, पर्यवेक्षकः रामशङ्कर त्रिपाठी, केन्द्रीय उच्च तिब्बती शिक्षा संस्थान (विश्वविद्यालयः), सारनाथ, वाराणसी, २०१६।
- चन्द्रकीर्तिः, मध्यमकावतारः, सम्पादकः पी. एल. वैद्यः, बौद्धसंस्कृतग्रन्थमाला (ग्रन्थाङ्कः ११), मिथिला विद्यापीठम् (संस्थानम्), दरभंगा, १९६०।
- उपाध्यायः, बलदेवः , बौद्धदर्शनमीमांसा, चौखम्बा विद्याभवन, वाराणसी, १९८९।
- Āryadeva. The Catuḥśataka of Āryadeva: Sanskrit and Tibetan Texts with Copious Extracts from the Commentary of Candrakīrti. Ed. Vidhushekhara Bhattacharya. Part II. Calcutta: Visva-Bharati Book-Shop, 1931.
- Nāgārjuna. Dharmasaṅgrahaḥ (Excellent Collection of Doctrine). 4th reprint. Trans. Tashi Zangmo and Dechen Chime. Sarnath, Varanasi: Central University of Tibetan Studies, 2013.
- Āryadeva. Āryadeva's Catuḥśataka: On the Bodhisattva's Cultivation of Merit and Knowledge. Trans. Karen Lang. Copenhagen: Akademisk Forlag, 1986.


**संदर्भ**

Dharmasaṁgrahaḥ , Nā gā rjuna, P.no.64

The Catuḥ ś ataka of Ā ryadeva, chapter X, P.no. 69

नागार्जुनस्य मध्यमकशास्त्रम्, 18.1, पृ. 145

चन्द्रकीर्ति मध्यमकावतारः, षष्ठ परिच्छेदः, कारिका 6.120.

नागार्जुनस्य मध्यमकशास्त्रम्, 18.2,पृ.147

नागार्जुनस्य मध्यमकशास्त्रम्, 18.2, पृ.148

आर्यदेवस्य चतुःशतकम्(1971), दशम प्रकरणम्, श्लोकः 10.1 पृ. 46

The Catuḥśataka of Āryadeva , Chapter X, Pg. no. 70

आर्यदेवस्य चतुःशतकम्, दशम प्रकरणम्, श्लोकः 10.2, पृ.45

आर्यदेवस्य चतुःशतकम्(1971), दशम प्रकरणम्, श्लोकः 10.3, पृ.47

The Catuḥśataka of Āryadeva, chapter X, P.no. 72

The Catuḥśataka of Āryadeva, chapter X, P.no. 72

आर्यदेवस्य चतुःशतकम्(1971), दशम प्रकरणम्, श्लोकः 10.4, पृ.48

आर्यदेवस्य चतुःशतकम्(1971), दशम प्रकरणम्, श्लोकः 10.7, पृ.50

The Catuḥśataka of Āryadeva(1931), chapter X, P.no.87

Dharmasaṁgrahaḥ, Nāgārjuna, P.no.12